International Journal of Applied Research 2015; 1(7): 685-688




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2015; 1(3): 685-688
www.allresearchjournal.com
Received: 10-04-2015
Accepted: 13-05-2015

**माखनदासः**
**कलिकाताविश्वविद्यालयस्य संस्कृतविभागस्य गवेषकः छात्रः**

**Correspondence**
**माखनदासः**
कलिकाताविश्वविद्यालयस्य
संस्कृतविभागस्य गवेषकः छात्रः

# वर्तमाने जीवने संस्कृतसाहित्यस्य उपदेशाः

**माखनदासः**

समाजस्य सुस्थतायाः, स्वच्छतायाः च रक्षणार्थं संस्कृतसाहित्यस्य उपदेशाः अतीव गुरुत्वपूर्णाः । केन कर्मेण पापः जायते, केन कर्मेण पुण्यं वा सम्पद्यते, एतद् वयं शिक्षाभिः लभामहे । उपदेशः शव्दस्य उत्पत्तिः–उप पूर्वकः दिश धातोः भावे घञ् प्रत्ययेन निष्पद्यते । यस्यार्थः –शिक्षादानं, मन्त्रदानम्, आदेशश्च । अधुना समाजे संस्कृतसाहित्यस्य उपदेशानां प्रयोजनं किम्? संस्कृतछात्रान् विना किमर्थम् अन्ये छात्राः संस्कृतस्य उपदेशानाम् अनुसरणं कुर्वन्ति । अधुनापि उपदेशः मिलति, अस्माकं वावारामदेवमुख्यमन्त्री-प्रधानमन्त्रीराष्ट्रपतिभिश्च उपदेशाः दीयन्ते । किमर्थं संस्कृततुल्यकठिनविषयस्य उपदेशान् अनुसरामः? अतः यदि वर्तमानोपदेशानां भावना कुतः आगतः एतद् दर्शयितुं शक्नोमि, एतेन मेलनेन जनानां मनःसु संस्कृतसाहित्यस्य उपदेशपठनाय उत्साहः उत्पन्नः भवति । वर्तमानसमाजस्य एतस्मिन् अवस्थायां प्राचीनस्य संस्कृतसाहित्यस्य उपदेशाः अतीव स्वीकार्याः । वेदस्मृतिशास्त्रनाटककाव्येषु सर्वेषु असंख्याः उपदेशाः आसन् । वर्तमाने आधुनिकाः जनाः शिशोः जन्मनः शिशुं मातृदुग्धम् ऋते अन्यान्यानि खाद्यद्रव्याणि खादयन्ति किन्तु आधुनिकैः चिकित्सकैः सह संस्कृतसाहित्येन उपदेशः दीयते षष्ठमासपर्यन्तं मातृदुग्धं शिशोः अन्यतमखाद्यम्–

> “षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मङ्गलं कुले ।” (मनुसंहिता 2/34)

मादकद्रव्यम् अधुना यूनाम् एका जलन्ती समस्या । मादकद्रव्यस्य ग्रहणे बहूनां प्रतिभा नष्टा जाता, बहूनां परिवाराः ध्वंसाः अभवन् । यद्यपि प्राचीनकाले मादकद्रव्याणि न मिलन्ति तथापि मनुसंहितायां सुरापानस्य निषेधः अस्ति –

> “गौडी पैष्ठी च माध्वी च विज्ञेया त्रिविधा सुरा ।
> यथैवैका तथा सर्वा न पातव्या द्विजोत्तमैः।।” (मनुसंहिता 11/95)

अधुना aids रोगप्रतिरोधाय बहवः यौनसङ्गीनां परिहारः तथा स्वपत्न्या सह सम्भोगाय

उपदेशः प्रचारयति, मनुसंहितायां मनुना केवल मात्रं स्वपत्नीं प्रति अनुरक्तार्थम् उपदेशः दीयते–

"ऋतुकालाभिगामी स्यात् स्वदारनिरतः सदा ।" (मनुसंहिता-3/45)

सर्वदा निजपत्नीं प्रति प्रीतिः पोषणं कुर्याद्, कदापि रतिकाम्यया परदारं प्रति न अभिलषेत् ।
युवकः युवतीं प्रति प्रेमनिवेदनं करोति परन्तु यदा सः युवकः प्रत्याख्यातः भवतिः अनन्तरं सः युवतीं हत्वा, आम्लेन आक्रमणं करोति, संस्कृतसाहित्ये अयम् उपदेशः नास्ति । मृच्छकटिकनाटके शूद्रकेण उपदेशः दीयते -

"आलाने गृह्यते हस्ती वाजी वल्गासु गृह्यते ।
हृदये गृह्यते नारी यदिदं नास्ति गम्यताम् ।।"
(मृच्छकटिकम् 1/50)

वन्धनस्तम्भेण हस्तीं, मुखवल्गाया अश्वं, हृदयेण स्त्रीं च वध्यते, अन्यथा आशा त्याजेत् ।
इदानीम् अस्वच्छता, परिवेशस्य असुस्थता च एका भयंकरी समस्या । दूषणेन प्रकृतिः क्रमशः तस्याः चरित्रस्य परिवर्तनं करोति । फलतः पृथिव्याः उष्णता क्रमवर्धमाना, सर्वत्र पृथिव्याः विरुद्धाचारणं लक्ष्यते, उदाहरणस्वरूपः आमेरिकादेशे शीतकालस्य उष्णता हिमांकस्य अधिकः निम्ने अवस्थितः । वृक्षाणां क्रमशः ह्रासः यन्त्रगाराणां क्रमशः वृद्धिः, सर्वत्रः मलिनं च वृद्धिः भवति । यद्यपि प्राचीनकाले एतावत् परिवेशस्य दूषणः, अस्वच्छता च नासीत् । अतीते "स्वच्छभारताभियानम्" "एकः वृक्षः एकः प्राणः" प्रभृतिकथा च नासीत् तथापि संस्कृतसाहित्ये प्रकृति रक्षणाय बहवः उपदेशाः मिलन्ति । मनुसंहितायां पानीयादिकार्येव्यवहृतजलेषु पुरीषं, मूत्रं, छीवनं च उत्सर्गं तथा अपवित्रवस्त्रस्य धौतं, स्नानं च मनुः कठोररुपेण निषेधः करोति ।

"नाप्सु मूत्रं पुरीषं वा ष्ठीवनं वा समुत्सृजेत् ।
अमेध्यलिप्तमन्यद्वा लोहितं वा विषाणि वा ।।"
(मनुसंहिता 4/56)

अतीते ग्रामस्य नगरस्य वा मार्गं दूषितकरणं, गमनमार्गेषु सुस्थैः जनैः पूरीषमूत्रौ उत्सर्गं, पानीयादितडागस्य दूषणम् एकः दण्डनीयः अपराधः विवेचितः । अतः मनुना वासगृहाद् दूरवर्तीस्थाने पुरीषत्यगार्थं निर्देशः दीयते । प्राचीनकाले ग्रामं परितः वृक्षरोपणाय निर्देशः आसीत् ।
मातापितरौ अस्माकं देवतातुल्यौ, तौ अम्सान् कष्टेन लालयतः, जन्मसमये माता बहुकष्टं सहते । शतवत्सरैः शतजन्मभिः वा तेषां धनं परिशोधं न समर्थम् । ते अद्यः दुर्दशाग्रस्ताः, कदापि तेषां पुत्रगृहे स्थानं न मिलति अपरश्च शिक्षकः छात्रान् ज्ञानदानम्, अज्ञानदूरीकरणं च करोति । प्रतिदानेन किम मिलति ? छात्राः शिक्षकान् अपमानं ताडनं वा कुर्वन्ति । मनुसंहितायां मातापिताचार्याणां सेवा परमं तप इति कथ्यते –

"तेषां त्रयाणां शुश्रूषा परमं तप उच्यते"
(मनुसंहिता 2/229)

तैत्तिरीयोपनिषदिऽपि एतेषां देवता इति मन्यते-

"मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव"।

अक्षक्रीडाऽपि अधुना एका भयंकरी समस्या । अक्षक्रीडया सर्वं नाशयित्वा जनः निःस्वः भवति तथा संसारः दुखःदुर्दशाग्रस्तः भवति । ऋग्वेदस्य अक्षसूक्ते अक्षक्रीडायाः निन्दा तथा कृषेः प्रशंसा चास्ति –

"अक्षैर्मा दीव्यः कृषिमित् कृषस्व" (ऋग्वेद 10/34/13)

महाभारतेऽपि युधिष्ठिरः अक्षक्रीडया चतुष्भातृन् पत्नीं च नश्यति स्म, यस्य फलस्वरूपः कुरुक्षेत्रस्य प्रान्तरे एकः भयावहः युद्धः घटितः । महाभारतस्य सभापर्वे दूतक्रीडायाः निन्दा उपलभ्यते -

"द्यूतेक्षत्तः कलहो विद्यते नः को वै द्यूतं रोचते वुध्यमानः ।
किं वा भवान् मन्यते युक्तरूपं भवद्वाक्ये सर्व एव स्थिताः स्म ।।" (सभापर्वम् 58/140)

अतः द्यूतेन सर्वं नष्टं जातं, शूद्रकः तस्य मृच्छकटिकनाटके अक्षक्रीडया अनासक्तार्थम् उपदिशति –

"सर्वं नष्टं द्यूतेनैव" (मृच्छकटिकम् 2/8)

शिशूनाम् अशिक्षा शिशुश्रमश्च भारतवर्षस्य तथा विश्वस्य समस्या । अधुना समग्रे भारतवर्षे षष्टिप्रयुतः शिशुश्रमिकाः, विश्वस्य एकादशप्रतिशतम् । (en.m.wikipedia.org/wiki/child labor. In). तथा समग्रविश्वे 250-304 प्रयुतः शिशुश्रमिकाः विद्यन्ते । (en.m.wikipedia.org/wiki/childlabor.in) । ते कदापि विद्यालये न गच्छन्ति, मातापितरौ सन्तानं विद्यालयस्य परिवर्ते कर्मक्षेत्रे प्रेषयतः । अस्मिन् विषये हितोपदेशग्रन्थे उपदेशः मिलति –

"माता शत्रुः पिता वैरी येन वालो न पाठितः"
(हितो–मित्रलाभः -38)

यः सन्तानं न पाठयति, सः सन्तानस्य शत्रु इति उच्यते । इदानींकाले "समीचीनस्य कार्यस्य लोभेन" तथा "प्रीत्याः अभिनयेन" अधिकसंख्यकाः नार्यः विक्रीया । नारी अज्ञातकुलशीलजनेन सह स्नेहं करोति, परवर्तिकाले तेन प्रियेण विक्रीयः भवति । हितोपदेशे एकः उपदेशः अस्ति

"अज्ञातकुलशीलस्य वासो देयो न कस्यचित्"
(हितो –मित्रलाभः -57)

अस्मिन् पितृतान्त्रिके समाजे नारी द्वितीयश्रेणी इति मन्यते । कन्या सर्वदा अवहेलिता, भारतवर्षे लिङ्गवैषम्यः एका समस्या । वर्तमाने कन्यानां पुत्राणां च अनुपातः उद्वेलनीयः - 1000:940 (www.cencuse2011.co.in) शिक्षिताः जनाः शिशोः जन्मनः पूर्वे आलट्रासनोग्राफी द्वारा लिङ्गनिर्णयं कृत्वा कण्यासन्तानं हत्वा कुर्वन्ति, भारतसरकारेण आलट्रासनोग्राफी निषिध्यते, तथापि नियमम् उलङ्घनं कृत्वा प्रचलति । परन्तु मनुना मनुसंहितायां कन्यासन्तानं पुत्रसम इति मन्यते –

"यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा।"
(मनुसंहिता-9/130)

जनाः तेषां जीवने उच्चाकाङ्खार्थं बहवः शोचयन्ति, परन्तु तद् पूरणार्थं उपयुक्तपरिश्रमं न कृत्वा परिवर्ते whatsapp, *facebook.* प्रभृतिः च कुर्वन्ति, अस्मिन् विषये हितोपदेशे उपदेशः मिलति –

"उद्यमेन हि सिद्धन्ति कार्य्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ।।"
(हितो-मित्रलाभः-36)

सिंहः वनस्य नृपः, तथापि सः शिकारः करोति, अतः अस्यां पृथिव्यां प्ररिश्रमं विना किमपि न सम्भवति ।
इदानीं परिवारेषु पतिपत्न्योः विच्छेदः एका समस्या । अनेन विच्छेदेन संसारे कल्याणं न भवति, तेषां सन्तानः अशान्तिग्रस्तः जातः, शिशुः मातापित्रोः स्नेहात् वञ्चितः । फलतः तेषां सम्यक् विकाशाय इयं घटना प्रधानवाधास्वरुपा । अयं विच्छेदः केन प्रकारेण वन्धः भवति, तथा एकश्रीवृद्धिकारी परिवारः परिगण्यते । मनुः तस्य मनुसंहितायाम् उक्तवान् –

"सन्तुष्टो भार्यया भर्ता भर्त्रा भार्या तथैव च ।
यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम् ।।
(मनुसंहिता 3/60)

यस्यिन् वंशे पतिः पत्नी च उभौ परस्परं परस्परेण प्रीतः भवति, अस्मिन् परिवारे सर्वप्रकारकल्याणं विद्यते ।
अधुना विश्वे आत्महत्यायाः वृद्धिः भवति । समग्रविश्वे आत्महत्यात्यगेन भारतवर्षस्य स्थानं प्रथमम् । परारि वत्सरे अस्मिन् देशे 1,35,445 जनैः आत्महत्या क्रियन्ते (en.M.wikipedia.org/wiki/Suicide.in/India) तथा समग्रविश्वे प्रायशः 800000 जनाः आत्महत्या कुर्वन्ति स्म । अप्राप्त्याः वेदना, प्रियजनस्य मृत्युः, समस्यासमाधाने व्यर्थता च प्रभृतिभिः कारणैः जनः आत्महत्या करोति । अस्मिन् विषये गीतायाम् उपदेशः मिलति –

"कर्म्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्म्मफलहेतुर्भूर्म्मा ते सङ्गोऽस्त्वकर्म्मणि ।।"
(श्रीमद्भगवदगीता 2/47)

भासस्य स्वप्नवासवदत्ते नाटके अस्ति –

"कालक्रमेण जगतः परिवर्तमानाः चक्रारपङक्तिरिव गच्छति भाग्यपङक्तिः"
अपिच "कः कं शक्तो रक्षितुं मृत्युकाले रज्जुच्छेदे के घटं धारयन्ति" (स्वप्नवासवदत्तम् 6/10)

एतैः उपदेशैः जनः नूतनरुपेण जीवणयापणं कर्तुं शक्नोति। कर्मे फक्किका भारतवर्षस्य विकाशाय एका समस्या। जनानाम् अपितु सरकारीकर्मचारीणां कर्मे फक्किका प्रतिरोधाय विभिन्नेषु दप्तरेषु C.C. TV स्थापनं करोति, कदापि कर्मचारी वरखास्तः अपि भवति। संस्कृतसाहित्ये कालिदासस्य रचनासु कर्तव्यपालनेन तस्य कठोरमनोभावं स्फुटितम्। अभिज्ञानशकुन्तलंनाटके कर्तव्यावहेलार्थं शकुन्तलां कष्टं सहते। यत्र कर्म विच्युतिः तत्र कालिदासः क्षमाहीनः, दीलिपेण पूज्यस्य अपूज्यार्थं सन्तानहीनस्य अभिशापः, यक्षस्य कर्तव्यावहेलाय कुवेरस्य पद्मवने ऐरावतस्य उपद्रवः। अतः वर्षभोग्यः अभिशापः।

वर्तमानसमाजे एका लोकश्रुतिः अस्ति– पुत्रवधूः श्वशुरकुलस्य संसारं नाशयति"। अभिज्ञानशकुन्तलम् इति नाटकस्य चतुर्थाङ्के महर्षिणा कण्वेन शकुन्तलां प्रति उपदेशः दीयते –

"शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी यान्त्येवं
गृहिणीपदं युवतयो वामाः कुलस्याधयः ।।"
(अभिज्ञानशकुन्तलम् 4/18)

परिशेषे, समाजेषु संस्कृतसाहित्यस्य उपदेशस्य प्रयोजनीयता अतीते आसीद्, वर्तमाने अस्ति, भविष्येऽपि स्थास्यति। वर्तमाने शिक्षिताः जनाः, विज्ञानमनस्कजनाः च संस्कृतसाहित्यम् अस्वीकार्यम्, अवहेलां च कुर्वन्ति, तथापि इमे उपदेशाः अमृततुल्याः। अतः सुस्थसमाजगठनाय, सुस्थजीवनयापनाय च प्रत्येकं संस्कृतसाहित्यस्य उपदेशान् पालयतु।

## ग्रन्थसूची


1. अभिज्ञानशाकुन्तलम्; कालिदासः; सम्पादकः सत्यनारायणचक्रवर्तीः; संस्कृतपुस्तकभाण्डारः; कोलकाता; 2006 षष्ठसंस्करणम् (1988 प्रथमसंस्करणम्)
2. उपनिषदग्रन्थावलीः (प्रथमभागः); सम्पादकः स्वामीगम्भीरानन्दः; कोलकाता; चतुर्दशपुनर्मुद्रणम् Sep 2010 (20 March 1962 सप्तसंस्करणम्)
3. किरातार्जुनीयम्; भारविः; सम्पादकः अशोककुमारवन्द्योपाध्यायः; सदेशः; कोलकाता; परिमार्जितं पुनर्मूद्रणं संस्करणं च 1415 वङ्गाव्दः।
4. विश्वासः,दीधितिः; वैदिकपाठसञ्चयनम्; पश्चिमवङ्गपुस्तकपर्षदः; कोलकाता; may 2013/B प्रथमसंस्करणम्।
5. मनुसंहिता; मनुः; सम्पादकः अनुवादकश्च मानवेन्दुवन्द्योपाध्यायः; संस्कृतपुस्तकभाण्डारः; कोलकाता; तृतीयसंस्करणं स्वाधीनतादिवसः 1419 वङ्गाव्दः (प्रथमसंस्करणं दोलयात्रा 1410 वङ्गाव्दः)।
6. मृच्छकटिकम्; शूद्रकः; सम्पादकः उदयचन्द्रवन्द्योपाध्यायः अनीतावन्द्योपाध्यायश्च; संस्कृतवुकडिपो; कोलकाता; प्रथमप्रकाशं महालया 2007।
7. श्रीमद्भगवदगीता; अनुवादकः श्रीयुक्तभूतनाथसप्ततीर्थः, सम्पादकः श्रीयुक्तनलिनीकान्तव्रह्मः; नवभारतपावलिशार्सः; कोलकाता; January 2006 पुनर्मुद्रणम् (1393 वङ्गाव्दः प्रथमसंस्करणम्)।
8. स्वप्नवासवदत्तम्; भासः; सम्पादकः अनुवादकश्च शान्तिवन्द्योपाध्यायः; संस्कृतपुस्तकभाण्डारः; कोलकाता; षष्ठपरिवर्तितसंस्करणं पुस्तकमेलकम् 1411 वङ्गाव्दः; (प्रथमसंस्करणम् 1402 वङ्गाव्दः)।
9. हितोपदेशः; नारायणशर्माः; ramkrishna mission institute of culture; कोलकाता; call no – 891.28/हितो/s।